॥ श्रीराघवेंद्रमंगळाष्टकम् ॥

श्रीमद्रामपदारविंदमधुपः श्रीमध्ववंशाधिपः
सच्छिष्योडुगणोडुपः श्रितजगद्गीर्वाणसत्पादपः ।
अत्यर्थं मनसा कृताच्युतजपः पापांधकारातपः
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ १ ॥

कर्मंदींद्रसुधींद्रसद्गुरुकरांभोजोद्भव संततं
प्राज्यध्यानवशीकृताखिलजगद्वास्तव्यलक्ष्मीधवः ।
सच्छास्त्रादिविदूषकाखिलमृषावादीभकंठीरवः
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ २ ॥

सालंकारककाव्यनाटककलाकाणादपातंजल
त्रय्यर्थस्मृतिजैमिनीयकवितासंगीतपारंगतः ।
विप्रक्षत्रविडंघ्रिजातमुखरानेकप्रजासेवितः
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ ३ ॥

रंगोत्तुंगतरंगमंगळकरश्रीतुंगभद्रातट
प्रत्यस्थद्विजपुंगवालयलसन् मंत्रालयाख्ये पुरे ।
नव्येंद्रोपलनीलभव्यकरसद्बृंदावनांतर्गतः
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ ४ ॥

विद्वद्राजशिरः किरीटखचितानर्घ्योरुरत्नप्रभा
रागाघौघहपादुकद्वयचरः पद्माक्षमालाधरः ।
भास्वद्दंडकमंडलोज्वलकरा रक्तांबराडंबरः
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ ५ ॥

यद्बृंदावनसत्प्रदक्षिणनमस्काराभिषेकस्तुति
ध्यानाराधन मृद्विलेपनमुखानेकोपचारान् सदा ।
कारंकारमभिप्रयांति चतुरो लोकाः पुमर्थान् सदा
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ ६ ॥

वेदव्यासमुनीशमध्वयतिराट्टीकार्यवाख्यामृतं
ज्ञात्वाद्वैतमतं हलाहलसमं त्यक्त्वा समाख्याप्तये ।
संख्यावत्सुखदां दशोपनिषदां व्याख्यां समाख्यन्मुदा
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ ७ ॥

श्रीमद्वैष्णवलोकजालकगुरुः श्रीमत्परिव्राढ्भरुः
शास्त्रे देवगुरुः श्रितामरतरुः प्रत्यूहगोत्रस्वरुः ।
चेतोतीतशिरुस्तथा जितवरुः सत्सौख्यसंपत्करुः
श्रीमत्सद्गुरुराघवेंद्रयतिराट् कुर्याद्ध्रुवं मंगलं ॥ ८ ॥

यः संध्यास्वनिशं गुरोर्व्रतिपतेः सन्मंगलस्याष्टकं
सद्यः पापहरं स्वसेविविदुषां भक्त्यैव बाभाषितं ।
भक्त्या व्यक्ति सुसंपदं शुभपदं दीर्घायुरारोग्यकं
कीर्तिं पुत्रकळत्रबांधवसुहृन्मूर्ति प्रयाति ध्रुवम् ॥ ९ ॥

॥ इति श्री अप्पण्णाचार्यकृतं श्रीराघवेंद्रमंगळाष्टकं संपूर्णं ॥